No. क

Title वैदिक सन्ध्या

Author

Extent ७ पत्र Age

Subject कर्मकाण्ड (धर्मशास्त्र)

वैदिकसंध्या

#5732

F-6

Complete

सं. १

ॐश्रीगणेशायनमः अथसंध्याप्रयोगः ॐविष्णुः
ॐविष्णुः विष्णुरितित्रिराचम्य सप्रणवगायत्र्याशिखां
बद्ध्वा ऋतमित्यभिमंत्र्य पुनराचमेत् ॐअघमर्षण
सूक्तस्या घमर्षणऋषिः अनुष्टुप्छंदः भाववृत्तंदै
वतं अश्वमेधावभृथेविनियोगः ॐऋतंच सत्यंचा
भीद्धात्तपसोध्यजायत ततोरात्र्यजायत ततःसमु
द्रोऽर्णवः समुद्रादर्णवादधि संवत्सरो अजायत अ
होरात्राणि विदध द्विश्वस्य मिषतोवशी सूर्याचंद्रम

सौयातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरि
क्षमथोस्वः ततोवारिणात्मानं वेष्टयित्वासप्रणवगा
यत्र्यारक्षांकुर्यात् ॐकारस्यब्रह्माऋषि गायत्रीछंदो
ग्निर्देवता शुक्लोवर्णः सर्वकर्मारंभेविनियोगः ॐ
सप्तव्याहृतीनां प्रजापतिऋषिः गायत्र्युष्णिगनुष्टुब्
बृहतीपंक्तिस्त्रिष्टुप् जगत्यश्छंदांस्यग्निर्वाय्वादित्य
बृहस्पतिवरुणेन्द्र विश्वेदेवादेवता अनादिष्टप्राय
श्चित्ते प्राणायामेविनियोगः ॐगायत्र्याविश्वामित्र

सं २ 2 ऋषिः गायत्रीछंदः सविता देवताग्निमुखे मुपनयने प्राणायामेविनियोगः ॐशिरसः प्रजापतिऋषि स्त्रि पदागायत्रीछंदो ब्रह्माग्निवायुः सूर्यो देवता प्राणाया मेविनियोगः ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुर्वरेण्यं भर्गोदेवस्य धी महि धियोयोनः प्रचोदयात् आपोज्योतिरसोमृ तं ब्रह्मभूर्भुवस्वरोम् ॐसूर्यश्चमेति सूर्योदेवता प्रकृतिछंदः अपामुपस्पर्शनेविनियोगः ॐसूर्य

ब्रह्माऋषिः

श्चमामन्युश्च मन्युपतयश्चमन्युःकृतेभ्यःपापेभ्यो रक्षं
ता यद्रात्र्या पापमकार्षं मनसावाचा हस्ताभ्यां पद्भ्या
मुदरेणाशिश्ना रात्रिस्तदवलुंपतुयत्किंचिद्दुरितं मयि
इदमहमापोमृतयोनौ सूर्येज्योतिषि जुहोमिस्वाहा
ॐआपोहिष्ठेत्यादिऋचस्य सिन्धुद्वीपऋषिः गायत्रीछं
दः आपोदेवता मार्जनेविनियोगः ॐआपोहिष्ठामयो
भुवः ॐतानऊर्जेदधातन ॐमहेरणायचक्षसे ॐयो
वःशिवतमो रसः ॐतस्यभाजयतेहनः ॐउशतीरि

सं
३
3

वमानरः ॐतस्माअरंगमामवो ॐयस्यक्षयायजिन्वथ
ॐआपोजनयथाचनः ॐद्रुपदादिवेत्ति कोकिलराज
पुत्रऋषि रनुष्टुप्छंदः आपोदेवता सौत्रामण्यव
भृथेविनियोगः ॐद्रुपदादिवमुमुचानः स्विन्नःस्ना
तोमलादिव पूतंपवित्रेणेवाज्य मापःशुंधंतुमैन
सः ॐअघमर्षणसूक्तस्याघमर्षणऋषि रनुष्टुछं
दः भाववृत्तंदैवतं अश्वमेधावभृथेविनियोगः ॐ
ऋतंचासत्यंचाभीद्धा तपसोध्यजायत ततोरात्रिजा

यत ततः समुद्रोऽर्णवः समुद्रादर्णवादधि संवत्स
रोऽजायत अहोरात्राणि विदध द्विश्वस्य मिषतो व
शी सूर्याचंद्रमसौ धाता यथा पूर्वमकल्पयत्
दिवंच पृथिवीं चांतरिक्षमथो स्वः ॐ अंतश्चरसी
ति तिरश्चीनऋषिः अनुष्टुप्छंदः आपो देवता अ
पामुपस्पर्शने विनियोगः अंतश्चरसि भूतेषु गुहा
यां विश्वतोमुखः त्वं यज्ञस्त्वं वषट्कार आपो ज्योति
रसोऽमृतं ब्रह्म भूर्भुवःस्वरोम् ॐ उद्वयंतमित्यस्य

सं
य

हिरण्यस्तूपऋषिः गायत्री अनुष्टुप्छंदः सूर्यो देवता
सूर्योपस्थाने विनियोगः ॐउद्वयंतमसस्परि स्वःप
श्यंतउत्तरं देवन्देवत्रा सूर्य मगन्मज्योतिरुत्तमम् ॐउ
दुत्यमिति प्रस्कण्वऋषि गायत्रीछंदः सूर्यो देवता
सूर्योपस्थाने विनियोगः ॐउदुत्यंजातवेदसं देवंव
हंति केतवः दृशेविश्वायसूर्यम् ॐचित्रमित्यस्य कौ
त्सऋषिः त्रिष्टुप्छंदः सूर्यो देवता सूर्योपस्थानेवि
नियोगः ॐचित्रंदेवाना मुदगादनीकं चक्षुर्मित्रस्यव

रुणस्याग्नेः आप्राद्यावापृथिवी अन्तरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च ॐ तच्चक्षुरित्यस्य दध्यङ्गाथर्वण
ऋषिः उष्णिक्छन्दः सूर्यो देवता सूर्योपस्थाने विनि
योगः ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् प
श्येम शरदः शतं जीवेम शरदः शतं शृणुयाम
शरदः शतं प्रब्रवाम शरदः शतं अदीनाः स्याम श
रदः शतं भूयश्च शरदः शतात् ॐ हृदयाय नमः
ॐ भूः शिरसे स्वाहा ॐ भुवः शिखायै वषट् ॐ स्वः क

सं॰
५

वचायर्ङ्ग ॐभूर्भुवःस्वःनेत्रत्रयायवौषट् ॐकारस्य ब्रह्मा
ऋषि गीयत्रीछंदो अग्निर्देवता जपेविनियोगः ॐतेजो
सीति देवाऋषयः शुक्रंदैवतं गायत्रीछंदो ॐगाय
त्र्यावाहनेविनियोगः ॐतेजोसि शुक्रमस्य मृतमसि
यामनामासि प्रयंदेवानामनाधृष्टं देवयजनमसि
इति गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पयपदसि
नहिपद्यसे नमस्तेतुरीयाय दर्शिताय पदाय परोरज
से सावदोमित्युपस्थाय अथध्यानं श्वेतवर्णासमुद्दिष्टा

कौशेयवसनातथा स्रेतै विलेपनैः पुष्पैरलंकार
स्वभूषिता आदित्यमंडलस्थाचब्रह्मलोकगताथ
वा अक्षसूत्रधरादेवीपद्मासनगताशुभा इतिध्या
नम् ॐभूर्भुवःस्वः तत्सवितु र्वरेण्यं भर्गोदेवस्य
धीमहि धियोयोनःप्रचोदयात् इतिजप्त्वा विसर्ज
येत् भगवतिसंध्ये नमस्तस्यान्तंगच्छ प्रदक्षिणांकु
र्यात् इतिसंध्याप्रयोगः ॐभूर्भुवःस्वःतत्सवितु र्व
रेण्यं भर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् त

सं ९ 6

त्सहस्र ॥
आपःपुनंत्विति विश्वऋषिः अनुष्टुछंदः आपोदेव
ता अपामुपस्पर्शनेविनियोगः आपःपुनंतुपृथिवी
पृथ्वीपूतापुनातुमां पुनातुब्रह्मणस्पतिर्ब्रह्मपू
तापुनातुमां यदुछिष्टमभोज्यंवायद्वादुश्चरितं
मम सर्वंपुनातुमामापो सतांचप्रतिग्रहंज्जुहो
मिस्वाहा इतिमध्याह्ने ॐआग्निश्चमेति रुद्रऋषिः
प्रकृतीछंदः आपोदेवता अपामुपस्पर्शनेविनियो

गः ॐअग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृते
भ्यः पापेभ्योरक्षन्तां यदह्नःपापमकार्षं मनसा
वाचाहस्ताभ्यां पद्भ्यामुदरेणशिश्ना अहस्तदव
लंपतु यत्किंचिद्दुरितंमयि इदमहमापोमृत
योनौसत्येज्योतिषिजुहोमिस्वाहा इतिसायमाच
मेत् ॥

